अष्टमः पाठः
८

# आदर्शपरिवारः

(भारतदेशे आदर्शपरिवारस्य महत्ता संसारे अद्वितीया अस्ति। स्वराष्ट्रे संयुक्तपरिवारस्य व्यवस्था अनादिकालात् प्रचलिता अस्ति। भारतीयसंस्कृत्याः अनुसारेण पशुपक्षिणः वृक्षपादपादीन् प्रति आत्मवत् संरक्षणभावः प्रमुखः वर्तते।)



एकस्मिन् ग्रामे विश्वनाथः नामधेयः सज्जनः वसति। तस्य परिवारः संयुक्तपरिवारः अस्ति। तस्य पत्नी गौरी अस्ति। विश्वनाथः षड्त्रिंशद्वर्षीयः तस्य पत्नी गौरी द्वात्रिंशद्वर्षीया चास्ति। विश्वनाथस्य हृदयम् अतीव उदारं गौर्याः स्वभावश्चातीव मृदुलः विद्यते। एतयोः एकः पुत्रः एका च पुत्री स्तः। पुत्रस्य नाम गणेशः पुत्र्याः नाम च गीता अस्ति। गणेशः द्वादशवर्षीयः गीता च अष्टवर्षीया स्तः। गणेशः अष्टमकक्षायां गीता चतुर्थकक्षायां च पठतः। परिवारे पितामहः पितामही, भ्राता, भ्रातृजाया, तस्य पुत्रः पुत्री च निवसन्ति। तस्य परिवारे प्रतिदिनं प्रातः स्मरणम्, भोजनमन्त्रः च भवतः।

**प्रातःस्मरणम्** – कराग्रे वसते लक्ष्मीः, करमध्ये सरस्वती।
करमूले तु गोविन्दः, प्रभाते करदर्शनम्।।

**भोजनमन्त्रम्** – ॐ ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना।।
ॐ शान्तिः शान्तिः शान्तिः।।

विश्वनाथः कुशलकृषकः अपि अस्ति। तस्य गृहाङ्गणे वृन्दापादपः विकसति। परिवारजनाः तस्य अर्चनं कुर्वन्ति। सः सर्वदा कृषिकर्मणि तत्परः स्वकर्त्तव्यं पालयति। सः परिश्रमं कृत्वा स्वक्षेत्रे पर्याप्तमात्रायां शाकानि फलानि च उत्पादयति। आम्रनिम्बादिवृक्षैः आच्छादितं गृहमत्यन्तं रमणीयं वर्तते। तस्य गृहे एका श्वेतवर्णा धेनुः वर्तते। सा दुग्धं ददाति। तस्याः दुग्धेन निर्मितं दधिघृतयुक्तं भोजनं सर्वे कुर्वन्ति। तस्य गृहे आहारे शाकानां फलानां चाधिक्यं वर्तते। तौ भ्रातृभगिन्यौ यथेच्छं दुग्धं पिबतः। स्वच्छानि वस्त्राणि परिधाय प्रसन्नौ स्वस्थौ तौ मातरं पितरं च प्रणम्य पठनाय स्वविद्यालयं प्रतिगच्छतः।

गृहिणी गौरी स्वस्था आदर्शभूता च अस्ति। सः विश्वनाथः स्वपत्नीं बहु आद्रियते। अनेन कारणेन

परस्परं सर्वेषु महती प्रीतिः ऐक्यभावः स्नेहसौहार्द्रपूर्णः च व्यवहारः अस्ति। एतत् सयुंक्तपरिवारे एव सम्भवति। एकः आदर्शपरिवारः आहारस्य वस्त्रस्य गृहस्य च व्यवस्था संयुक्तपरिवारे एवं समुचितरूपेण भवति। अनेनैव समाजस्य राष्ट्रस्य च कल्याणं भवितुम् एतत् संयुक्तपरिवारे एव सम्भवति।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| एकस्मिन् ग्रामे | एकग्रामे | एक गांव में |
| वसति | निवसति | रहता है |
| कक्षायाम् | पठनकक्षे | कक्षा में |
| कर्मणि | कार्ये | कर्म में |
| तत्परः | संलग्नः | लगा हुआ |
| तस्य गृहे | तद्भवने | उसके घर में |
| निम्बः | नीम्बस्य वृक्षः | नीम का वृक्ष |
| प्रणम्य | नत्वा | प्रणाम करके |
| पितामही | पितुः माता | दादी |
| भ्राता | अग्रजः | भाई |
| भ्रातृजाया | भ्रातुः पत्नी | भाभी |
| कराग्रे | हस्ताग्रे | हाथ के अग्रभाग में |
| प्रभाते | प्रातःकाले | प्रातःकाल में |
| वृन्दापादपम् | तुलसीपादपम् | तुलसी का पौधा |
| यथेच्छम् | इच्छानुसारम् | इच्छा के अनुसार |
| संयुक्तः | सम्मिलितः | सामूहिक |

## अभ्यासः

१. **निम्नलिखित शब्दानाम् उच्चारणं कुरुत –**

षट्त्रिंशद्वर्षीयः, द्वात्रिंशद्वर्षीया, स्वभावश्चातीव, ब्रह्मार्पणम्,
ब्रह्माग्नौ, आम्रनिम्बादिवृक्षैः सौहार्द्रपूर्णः, ऐक्यभावः

२. **निम्नलिखितप्रश्नान् एकपदेन उत्तरत -**

(क) एकस्मिन् ग्रामे कः वसति ?

(ख) विश्वनाथस्य पत्न्याः किं नाम अस्ति ?

(ग) विश्वनाथः किं कार्यं करोति ?

(घ) विश्वनाथस्य गृहे एका श्वेतवर्णा का वर्तते ?

(ङ.) कस्य परिवारः आदर्शः अस्ति ?

३. **निम्नलिखितप्रश्नान् एकवाक्येन उत्तरत -**

(क) संयुक्तपरिवारः कस्य अस्ति ?

(ख) विश्वनाथस्य पुत्रस्य नाम किम् अस्ति ?

(ग) विश्वनाथस्य गृहाङ्गणे कः पादपः अस्ति ?

(घ) विश्वनाथस्य गृहे का धेनुः अस्ति ?

(ङ) विश्वनाथः काम् आद्रियते ?

४. **मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत -**

| अष्टमी, चतुर्थकक्षायाम्, कृषि, दुग्धेन, एकः |
|---|

(क) गणेशः ................कक्षायां गीता .............. च पठतः।

(ख) तस्याः ................................ निर्मितं भोजनं कुर्वन्ति।

(ग) विश्वनाथः सर्वदा ............................... कार्यं करोति।

(घ) अयम् ...........................................आदर्शपरिवारः।

५. **यथायोग्यं पदद्वयं संयोज्य स्वाभ्यासपुस्तिकायां लिखत -**

| (क) | (ख) |
|---|---|
| (क) परिवारे पितामहः पितामही। | (अ) भोजनमन्त्रः च भवतः। |
| (ख) तस्य परिवारे प्रतिदिनं प्रातःस्मरणम्। | (आ) भ्राता, भ्रातृजाया तस्य पुत्रः पुत्री च निवसन्ति। |
| (ग) ब्रह्मार्पणं ब्रह्म हविः। | (इ) ब्रह्माग्नौ ब्रह्मणा हुतम्। |
| (घ) तेषाम् आहारे शाकानाम्। | (ई) यथेच्छं दुग्धं पिबतः। |
| (ङ.) तौ भ्रातरौ। | (उ) फलानाम् चाधिक्यं वर्तते। |

६. **रेखाङ्कितानि पदानि अधिकृत्य प्रश्ननिर्माणं कुरुत -**

(क) विश्वनाथस्य धेनुः कृष्णा अस्ति।

(ख) पुत्रस्य नाम गोविन्दः अस्ति।

(ग) विश्वनाथस्य संयुक्तः परिवारः अस्ति।

(घ) गौरी आदर्शभूता अस्ति?

७. **निम्नलिखितशब्दानां षष्ठी विभक्तिं कृत्वा लिखत -**


| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा- | बालकस्य | बालकयोः | बालकानाम् |
| (क) | रामः | ........................ | ........................ |
| (ख) | सुरेशः | ........................ | ........................ |
| (ग) | महेशः | ........................ | ........................ |
| यथा- | रमायाः | रमयोः | रमाणाम् |
| (घ) | गीता | ........................ | ........................ |
| (ङ) | सीता | ........................ | ........................ |
| (च) | अग्रजा | ........................ | ........................ |

८. **निम्नलिखितशब्दानां षष्ठी विभक्तिं कृत्वा लिखत -**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा- | नद्याः | नद्योः | नदीनाम् |
| (क) | गौरी | ........................ | ........................ |
| (ख) | पार्वती | ........................ | ........................ |
| (ग) | माधवी | ........................ | ........................ |
| यथा- | फलस्य | फलयोः | फलानाम् |
| (घ) | मन्दिरम् | ........................ | ........................ |
| (ङ) | मन्त्रम् | ........................ | ........................ |
| (च) | स्मरणम् | ........................ | ........................ |

## योग्यता-विस्तारः

### कस्य केन सह सम्बन्धः अस्ति इति परिशील्य वदत –




**अध्यापकाय निर्देशः –**

- अध्यापकः प्रातःस्मरणं व भोजनमन्त्रस्य स्मरणं कारयेत् ।
- अध्यापकः सम्बन्धवाचिशब्दानां ज्ञानं कारयेत् ।